Shri Raghunatha Temple MSS. Library,
JAMMU

No. १००१ - घ

Title नारायणोपनिषद्दीपिका

Author श्रीशंकराचार्यः

Extent ८ Age

Subject उपनिषत् · सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

४७३ नं० १००१-च

नारायणोपनिषत् सटीका (उपनिषत्)

पत्राणि ४ (सम्पूर्णम्)

नं० १००१-च

टीकाकर्त्ता शंकराचार्यः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सं० १७७५
[illegible]
४ पत्राणि
[illegible] - [illegible]
टीकाकर्त्ता - [illegible]

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणेशायनमः ॐ नारायणोपनिषदंभेदपर्वतभेदिनी व्या
ख्यास्येब्रह्मविद्यायाजननीपापहारिणी १ संबंधोविषयस्तद्व
त्साधिकारिप्रयोजनः सर्वोपनिषदांतुल्यस्तस्मान्नात्रोच्यतेपृ
थक् २ पुरुषःपरिपूर्णोदेशकालवस्तुपरिच्छेदशून्यइत्यर्थः
सप्रसिद्धः सर्वासूपनिषत्सुवैस्मर्यमाणः आपोनाराःताअय
नंयस्यसनारायणः अथवानाराःप्रतिबिंबकल्पाअयनमास्र

ॐ अथपुरुषोहवैनारायणोकामयत प्रजाःसृजेयेति

येनाश्रयोयस्य नारायणएवनारायणः यद्वानराविक्षिप्तचित्
तास्तेषामाश्रयोविद्यानरायणंतस्यअयनमाश्रयत्वेनसंबंधा
न्नारायणः यद्वाआरादुःखकारणानिनआराब्रह्मचर्यादीनि
साधनानिउदर्केसुखानि तान्ययनंप्राप्तिसाधनंयस्यसनारा १
यणः यद्वाआराःसंसारचक्रस्यकामक्रोधादयस्तेषामयनम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विद्यायेषां जीवानांतेआराःयणाःआत्मबोधशून्याः तद्विपरीत
आनंदात्मानारायणः अथवानारायणोवतारोनारायणोमुनि
निर्वृत्तिमार्गेनिरतानांपरमोगुरुः अकामयतकामनामकुरुत।
कामनामाह सृजेयेति प्रजाःपंचमहाभूतभौतिकरूपाः सृजेय
सृष्टिंकुर्वीय इत्यनेनप्रकारेणसंकल्प्यसृष्टिंसमग्रांससर्जेति।
नारायणात्प्राणोजायतेमनःसर्वेंद्रियाणिच खंवायुः।
ज्योतिरापश्चपृथ्वीविश्वस्यधारिणीः नारायणाद्ब्रह्मा
जायते नारायणात्प्रजापतिःप्रजायते नारायणादिंद्रो
बहिरेवावगंतव्यं श्रुतिस्तुचिन्मूर्तिमत्सत्वानांसृष्टिमाह नाराय
णाद्भूतात्ब्रह्माहिरण्यगर्भोविराट् सत्यलोकाधिष्ठितावाजाय
ते उत्पद्यतेसर्वासुसृष्टिस्थितिशेषः इंद्रःत्रिलोकीपतिः द्वादशसं
ख्याकादित्यामासाःतदधिष्ठातारोवाधात्रादयःरुद्राएकादशे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ना॰टी॰
३॰

२

द्रियाणि अपरे चैकादश आदित्यगणरूपाः किंविशेषगणेन या सा
वैपिनिखिलादेवतादेव्यापरदेवतावस्वाद्या इत्यर्थः न केवलं
सर्वादेवताः किंतु सर्वाण्यपि चकार उक्तानुक्तसमुच्चयार्थः
भूतानि स्थावरजंगमानि समहाभूतानि जायंते इति शेषः न
जायते नारायणाद्देवसर्वो नारायणादेकादशरुद्राः ना
रायणाद्वादशादित्याः सर्वा देवताः सर्वे ऋषयः सर्वाणि
छंदांसि सर्वाणि च भूतानि नारायणादेव समुत्पद्यंते ना
रायणे प्रलीयंते नारायणे प्रलीयंते इति प्रथमखंडः १॥
नु यथा कुलालचक्रचीवरमृदादिसहिता घटस्योत्पत्तिः किं त
था नारायणात्सर्वस्योत्पत्तिरित्याशंक्याह नारायणादेव न
त्वान्यसहकृतात्कुलालादेरिव समुत्पद्यंते सम्यग्जायंते उक्ता
नि सर्वाणीति शेषः ननु नारायणाद्देवास्तूत्पत्तिस्तथापि प्रल २
यो न्यस्मिन्भवतु यथा लूतातंतुनामित्यत आह नारायणे प्रकर्षे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

जगत्कारणत्वं नारायणस्योक्ते दानीं नित्यत्वादिक्रममाह अथे
ति अथ यस्माज्जगत्कारणं तस्मान्नित्यो विनाशरहितो देवः स्व
यं प्रकाशः एको देशकालवस्तुपरिच्छेदशून्यः इदानीमेकत्व
मुपपादयति ब्रह्मा च नारायणः वसवोष्टसंख्याका अग्निपृ
थिवीवाय्वंतरिक्षादित्यद्युचंद्रमोनक्षत्ररूपाः अश्विनौ देवभि
अथ नित्यो देव एको नारायणो ब्रह्मा च नारायणः सर्वे
ऋषयश्च नारायणः शक्रश्च नारायणः वसवोश्विनौ
च नारायणो द्वादशादित्याश्च नारायणः सर्वे ऋषयश्च
षजावपि चकारपंचकं वाक्यपंचकेपि शत्वेकमुक्तानुक्तसमु
च्चयार्थं सर्वैर्निखिला ऋषयः अतींद्रियस्य द्रष्टारो वेदव्यासा
दयः कालश्च कलवादिद्विपरार्धावसानव्यवहारकारणभूतो
पि दिशश्च प्राच्याद्या अपि अथ श्चार्ध्वो भागोपि ऊर्ध्वमूर्ध्वो भा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ना॰टी॰
उ॰
3

गोपि शरीराद्यंतर्बहिरपि नारायणः चकारपंचकं पूर्ववद्व्याख्येयं
किंबहुना नारायण एकेवक्त पूर्वो न त्वन्यः कश्चन इदं विविधप्र
संचगम्यं सर्वं निखिलं वर्त्तमानमेवेति बुद्धिं वारयति यत्प्रासि
संभूतमतीतं यदपि चकार उक्तानुक्तसमुच्चयार्थं भव्यं भावि
नारायणो कालश्च नारायणो दिशाश्च नारायणो अध
श्च नारायण ऊर्ध्वं च नारायणो मूर्त्तामूर्त्तं च नारायणो
न बहिश्च नारायणो नारायण एवेदं सर्वं यद्भूतं यच्च भव्यं
अथ नित्यो निष्कलो निराख्यातो निर्विकल्पो निरंजनः ॥
इदानीमुक्तमेवकत्वमंगीकृत्य पुनः पुनः कानिचिद्विशेषणान्यु
क्तं नारायणं प्रतिवक्तुमाह अथ यस्मादेको यस्मात्तस्मान्नित्यो
विनाशकारणाभावात्पूर्वं प्रतिज्ञातस्यानित्यत्वस्यान्तोपसंह 3
तिरिति न पुनरुक्तं निष्कलः प्राणादिकलारहितः अनेन का

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पश्चात् अंतेचनारायणायेतिव्याहरेत् इतिगेरोतेनर्थेचानुषज्जते

ते पठतिसार्थमिभयंगच्छतीत्यर्थः सअध्येतासर्वेभ्योनिखिलेभ्यो
घोरेभ्यःअघोरेभ्योबंधकारेभ्यइत्यर्थः विमुक्तोभवतीतिस्पष्टं न
केवलमेतत् किंतुसउक्तःसर्वांश्चनिखिलानपिचकार उक्तानु
क्तसमुच्चयार्थः लोकान्कर्मफलभोक्तानाप्नोति अपिचब्रह्मलं
पापेभ्योविमुक्तोभवति सघोरेभ्योविमुक्तोभवति सस
र्वान्कामानाप्नोति ससर्वांश्चलोकानाप्नोति ब्रह्मत्वंचग
त्वाम्रतत्वंचगच्छति अमृतत्वंचगच्छतीति ओमित्येतद
ग्रेव्याहरेन्नमः इतिपश्चान्नारायणायेत्युपरिष्टात् ॥
चहिरण्यगर्भमपिचकारः प्रकृतिप्राप्तिमथाह गत्वाब्रह्मामृत
त्वंचानंदात्मस्वरूपमपिचकारादिच्छानुसारेणादपिगच्छति।
प्राप्नोति इदंनारायणमंत्रमुद्धरति स्वरूपग्रहणमिदमितिअ
नुकरणार्थः अग्रेप्रथमंव्याहरेदुच्चरेत् नमइदमप्यक्षरस्वरूप

ति॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ना॰टी॰
उ॰
5

ओमिति व्याख्यातमेकाक्षरं नम इति द्वे अक्षरे नारायेति पंचाक्षरा
णि स्पष्टं एतद्वै उक्तमेव नारायणस्याष्टाक्षरं ओं नमो नारायणा
येति अष्टाक्षरयुक्तपदं पदनीयमवगंतव्यमित्यर्थः यो ह वै नारा
यणस्याष्टाक्षरं पदं स्पष्टं अध्येति स पाठं सार्थं च स्मरति अनप
ब्रुवः अपध्वंसो कीर्तिभाग्यागादिदोषेणाभिभूतादिरित्यर्थः ॥

ओमित्येकाक्षरं नम इति द्वे अक्षरे नारायणायेति पंचाक्ष
राणि एतद्वै नारायणस्याष्टाक्षरं पदं यो ह वै नारायणस्याष्टा
क्षरं पदमध्येत्यनपब्रुवः सर्वमायुरेति विंदते प्राजापत्यं राय
स्पोषं गौपत्यं ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति ॥

तद्विपरीतोनपब्रुवः सर्वं निखिलं शतसंवत्सरपर्यंतमायुः शरी
रात्प्राणानामनिर्गमकारणमेति गच्छति न केवलं जीवनं किंतु रा
यस्पोषं सुवर्णादिपुष्टं गोपतेर्भावस्तत्पशुपतित्वं विंदते प्राप्नोति
किं सुवर्णगोभिः पुष्टोऽनपब्रुवो दीर्घायुः प्रजावान्यः स्यादित्याश
ंक्य ततोऽमृतत्वं च ब्रह्मज्ञानं तस्मात्साध्यं फलमश्नुते इत्यभ्यासउ ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative